चरुरग्निवानिव। [1]आ रेवानेतु मा विशत्। रयेर्मतौ इति सम्प्रसारणम्। सरस्वतीवान् भारतीवान्(मै. ३.१०.६)। दधीवांश्चरुः। 'छन्दसि सर्वे विधयो विकल्प्यन्ते' (पु. प. ३५) इति इह न भवति, सर्प्तर्षिमन्तम्, ऋषिमान्, ऋतीमान्, सूर्यं ते द्यावापृथिवीमन्तम् इति। रेफान्तात् – गीर्वान्। धूर्वान्। आशीर्वान्॥

## अनो नुट्। (१६/३६०१)

[2]छन्दसि इति वर्तते। अनन्तादुत्तरस्य मतोः नुडागमो भवति छन्दसि विषये। 'अक्षण्वन्तः कर्णवन्तः सखायः' (ऋ. १०.७१.७)। 'अस्थन्वन्तं यदनस्था बिभर्ति' (ऋ. १.१६४.४)। अक्षण्वता लाङ्गलेन। 'शीर्षण्वती' (अ. वे. १०.१.२)। '[3]मूर्धन्वती' (तै. २.६.२.२)। नुटः असिद्धत्वात् तस्य च वत्वं न भवति, [4]ततः परस्य च भवति॥

## नाद् घस्य। (१७/३६०२)

नकारान्तात् उत्तरस्य घसञ्ज्ञकस्य नुडागमो भवति छन्दसि विषये। [5]सुपथिन्तरः। [6]दस्युहन्तमः।

[९१२] भूरिदाव्नस्तुड् वक्तव्यः। (म. भा. ३.३९८)

'भूरिदावत्तरः'[7] (ऋ. ८.५.३९)।

[९१३] ईद् रथिनः। (म. भा. ३.३९८)

रथिनः ईकारान्तादेशो घे परतः। 'रथीतरः' (ऋ. १.८४.५)। रथशब्दादेव वा मत्वर्थीयोऽयमीकारः [8]छन्दसीवनिपौ इति॥

## कृपो रो लः। (१८/२३५०)

[9]कृपेः धातोः रेफस्य लकारादेशो भवति। रः इति श्रुतिसामान्यमुपादीयते। तेन यः केवलो रेफो, यश्च ऋकारस्थः, तयोर्द्वयोरपि ग्रहणम्[10]। लः इत्यपि सामान्यमेव[11]। ततो[12]ऽयं केवलस्य रेफस्य स्थाने लकारादेशो विधीयते। ऋकारस्याप्येकदेशविकारद्वारेण ऌकारः, [13]एवं च 'लुटि च क्लृपः' (१.३.९३/२३५१) इत्येवमादयो निर्देशा उपपद्यन्ते। कल्प्ता। कल्प्तारौ। कल्प्तारः। [14]चिक्लृप्सति। क्लृप्तः। क्लृप्तवान्। कृपा इत्येतत्[15] 'कृपेः सम्प्रसारणं च' (ग. सू. ३६) इति भिदादिषु पाठाद् भवति। तस्य हि कृतसम्प्रसारणस्य लाक्षणिकत्वात् इह कृपः इति ग्रहणं नास्ति। कृपण[16]कृपीटकर्पूरादयोऽपि कृपेरेव द्रष्टव्याः। 'उणादयो बहुलम्' (३.३.१/३१६९) इति वा कृपेरेव[17] लत्वाभावः।

---

1. वैदर्भस्तवे आरेवान्येग्निनुमो विशन् क, आरेवानिन्द्र बाविशत् इ. 2. वाक्यमिदं नास्ति ह. ब. क. 3. मूर्धन्वतीरुपदधाति ह. 4. ततः नास्ति ड. 5. सुपथितरः सुपथितमः क. 6. दस्युहन्तमम् ऋ. 6-16-15 7. भूरिदावत्तमः इत्यधिकम् इ. क. 8. छन्दसि निपातितः ब. 9. छन्दसि इति निवृत्तम् इत्यधिकम् ब. ह. 10. भविष्यति इत्यधिकम् इ, भवति इत्यधिकम् ह. 11. उपादीयते इत्यधिकम् क. ड. 12. विज्ञायते इत्यधिकम् ब. 13. तथा क. ड. 14. चिक्लप्सति क. ह. ड. 15. तु इत्यधिकम् क. 16. कृपाण इत्यधिकम् क. ड. 17. एव नास्ति इ.